# 2026

# Chinmaya Gita Chanting Competition

## CHAPTER 12

## भक्तियोगः (bhakti-yogaḥ)

CHINMAYA
AMRIT MAHOTSAV
75 years

CHANT . STUDY . KNOW . LIVE

# CHAPTER 12

**भक्तियोग: (bhakti-yogaḥ)**

**ॐ श्रीपरमात्मने नम:। अथ द्वादशोऽध्याय:। भक्तियोग:।**

**om śrīparamātmane namaḥ. atha dvādaśo'dhyāyaḥ. bhaktiyogaḥ.**

| | | |
|---|---|---|
| 1 | **अर्जुन उवाच।<br>एवं सततयुक्ता ये<br>भक्तास्त्वां पर्युपासते।<br>ये चाप्यक्षरमव्यक्तम्<br>तेषां के योगवित्तमा:॥** | arjuna uvāca<br>evaṁ satatayuktā ye<br>bhaktāstvāṁ paryupāsate<br>ye cāpyakṣaramavyaktam<br>teṣāṁ ke yogavittamāḥ |
| 2 | **श्रीभगवानुवाच।<br>मय्यावेश्य मनो ये माम्<br>नित्ययुक्ता उपासते।<br>श्रद्धया परयोपेता:<br>ते मे युक्ततमा मता:॥** | śrībhagavānuvāca<br>mayyāveśya mano ye mām<br>nityayuktā upāsate<br>śraddhayā parayopetāḥ<br>te me yuktatamā matāḥ |
| 3 | **ये त्वक्षरमनिर्देश्यम्<br>अव्यक्तं पर्युपासते।<br>सर्वत्रगमचिन्त्यं च<br>कूटस्थमचलं ध्रुवम्॥** | ye tvakṣaramanirdeśyam<br>avyaktaṁ paryupāsate<br>sarvatragamacintyaṁ ca<br>kūṭasthamacalaṁ dhruvam |
| 4 | **सन्नियम्येन्द्रियग्रामम्<br>सर्वत्र समबुद्धय:।<br>ते प्राप्नुवन्ति मामेव<br>सर्वभूतहिते रता:॥** | sanniyamyendriyagrāmam<br>sarvatra samabuddhayaḥ<br>te prāpnuvanti māmeva<br>sarvabhūtahite ratāḥ |
| 5 | **क्लेशोऽधिकतरस्तेषाम्<br>अव्यक्तासक्तचेतसाम्।<br>अव्यक्ता हि गतिर्दु:खम्<br>देहवद्भिरवाप्यते॥** | kleśo'dhikatarasteṣām<br>avyaktāsaktacetasām<br>avyaktā hi gatirduḥkham<br>dehavadbhiravāpyate |

# CHAPTER 12

| | | |
|---|---|---|
| 6 | ये तु सर्वाणि कर्माणि<br>मयि सन्न्यस्य मत्पराः।<br>अनन्येनैव योगेन<br>मां ध्यायन्त उपासते॥ | ye tu sarvāṇi karmāṇi<br>mayi sannyasya matparāḥ<br>ananyenaiva yogena<br>māṁ dhyāyanta upāsate |
| 7 | तेषामहं समुद्धर्ता<br>मृत्युसंसारसागरात्।<br>भवामि नचिरात्पार्थ<br>मय्यावेशितचेतसाम्॥ | teṣāmahaṁ samuddhartā<br>mṛtyusaṁsārasāgarāt<br>bhavāmi nacirātpārtha<br>mayyāveśitacetasām |
| 8 | मय्येव मन आधत्स्व<br>मयि बुद्धिं निवेशय।<br>निवसिष्यसि मय्येव<br>अत ऊर्ध्वं न संशयः॥ | mayyeva mana ādhatsva<br>mayi buddhiṁ niveśaya<br>nivasiṣyasi mayyeva<br>ata ūrdhvaṁ na saṁśayaḥ |
| 9 | अथ चित्तं समाधातुम्<br>न शक्नोषि मयि स्थिरम्।<br>अभ्यासयोगेन ततः<br>मामिच्छाप्तुं धनञ्जय॥ | atha cittaṁ samādhātum<br>na śaknoṣi mayi sthiram<br>abhyāsayogena tataḥ<br>māmicchāptuṁ dhanañjaya |
| 10 | अभ्यासेऽप्यसमर्थोऽसि<br>मत्कर्मपरमो भव।<br>मदर्थमपि कर्माणि<br>कुर्वन्सिद्धिमवाप्स्यसि॥ | abhyāse'pyasamartho'si<br>matkarmaparamo bhava<br>madarthamapi karmāṇi<br>kurvansiddhimavāpsyasi |
| 11 | अथैतदप्यशक्तोऽसि<br>कर्तुं मद्योगमाश्रितः।<br>सर्वकर्मफलत्यागम्<br>ततः कुरु यतात्मवान्॥ | athaitadapyaśakto'si<br>kartuṁ madyogamāśritaḥ<br>sarvakarmaphalatyāgam<br>tataḥkuru yatātmavān |

# CHAPTER 12

## CHAPTER 12

| | | |
|---|---|---|
| 12 | श्रेयो हि ज्ञानमभ्यासात्<br>ज्ञानाद्ध्यानं विशिष्यते।<br>ध्यानात्कर्मफलत्यागः<br>त्यागाच्छान्तिरनन्तरम्॥ | śreyo hi jñānamabhyāsāt<br>jñānāddhyānaṁ viśiṣyate<br>dhyānātkarmaphalatyāgaḥ<br>tyāgācchāntiranantaram |
| 13 | अद्वेष्टा सर्वभूतानाम्<br>मैत्रः करुण एव च।<br>निर्ममो निरहङ्कारः<br>समदुःखसुखः क्षमी॥ | adveṣṭā sarvabhūtānām<br>maitraḥ karuṇa eva ca<br>nirmamo nirahaṅkāraḥ<br>samaduḥkhasukhaḥ kṣamī |
| 14 | सन्तुष्टः सततं योगी<br>यतात्मा दृढनिश्चयः।<br>मय्यर्पितमनोबुद्धिः<br>यो मद्भक्तः स मे प्रियः॥ | santuṣṭaḥ satataṁ yogī<br>yatātmā dṛḍhaniścayaḥ<br>mayyarpitamanobuddhiḥ<br>yo madbhaktaḥ sa me priyaḥ |
| 15 | यस्मान्नोद्विजते लोकः<br>लोकान्नोद्विजते च यः।<br>हर्षामर्षभयोद्वेगैः<br>मुक्तो यः स च मे प्रियः॥ | yasmānnodvijate lokaḥ<br>lokānnodvijate ca yaḥ<br>harṣāmarṣabhayodvegaiḥ<br>mukto yaḥ sa ca me priyaḥ |
| 16 | अनपेक्षः शुचिर्दक्षः<br>उदासीनो गतव्यथः।<br>सर्वारम्भपरित्यागी<br>यो मद्भक्तः स मे प्रियः॥ | anapekṣaḥ śucirdakṣaḥ<br>udāsīno gatavyathaḥ<br>sarvārambhaparityāgī<br>yo madbhaktaḥ sa me priyaḥ |
| 17 | यो न हृष्यति न द्वेष्टि<br>न शोचति न काङ्क्षति।<br>शुभाशुभपरित्यागी<br>भक्तिमान्यः स मे प्रियः॥ | yo na hṛṣyati na dveṣṭi<br>na śocati na kāṅkṣati<br>śubhāśubhaparityāgī<br>bhaktimānyaḥ sa me priyaḥ |
| 18 | समः शत्रौ च मित्रे च<br>तथा मानापमानयोः।<br>शीतोष्णसुखदुःखेषु<br>समः सङ्गविवर्जितः॥ | samaḥ śatrau ca mitre ca<br>tathā mānāpamānayoḥ<br>śītoṣṇasukhaduḥkheṣu<br>samaḥ saṅgavivarjitaḥ |

## CHAPTER 12

| | | |
|---|---|---|
| 19 | तुल्यनिन्दास्तुतिर्मौनी<br>सन्तुष्टो येन केनचित्।<br>अनिकेतः स्थिरमतिः<br>भक्तिमान्मे प्रियो नरः॥ | tulyanindāstutirmaunī<br>santuṣṭo yena kenacit<br>aniketaḥ sthiramatiḥ<br>bhaktimānme priyo naraḥ |
| 20 | ये तु धर्म्यामृतमिदम्<br>यथोक्तं पर्युपासते।<br>श्रद्दधाना मत्परमाः<br>भक्तास्तेऽतीव मे प्रियाः॥ | ye tu dharmyāmṛtamidam<br>yathoktaṁ paryupāsate<br>śraddadhānā matparamāḥ<br>bhaktāste'tīva me priyāḥ |

**ॐ तत्सत्।**
**इति श्रीमद्भगवद्गीतासु**
**उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे**
**भक्तियोगो नाम द्वादशोऽध्यायः॥**
**श्रीकृष्णार्पणमस्तु॥**

om tatsat
iti śrīmadbhagavadgītāsu upaniṣatsu
brahmavidyāyāṁ yogaśāstre śrīkṛṣṇārjunasaṁvāde
bhaktiyogo nāma dvādaśo'dhyāyaḥ
śrīkṛṣṇārpaṇamastu